३.न. १३५.

संस्कृत

# राजवाडे

नं - १३५

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

अंक

शाखा पद्धति

ग्रंथनाम मूळमंत्र. शिवादिदेव प्रतिष्ठापद्धतिः

ग्रंथकार

काल

पृष्ठ

स्थल

३७

(1)

॥अथप्रासादपूर्वकशिवादिसर्वदेवप्रतिष्ठापद्धतिः॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Bhavan Pratishthan, Mumbai."

(2)

प्रं०हे० श्रीगणेशायनमः॥ ॥अथप्रासादपूर्वकशिवार्चाप्रयोगः॥ ॥तत्रप्रतिष्ठाकालः
१ माघफाल्गुनवैशाखज्येष्ठाषाढेषुपंचसु॥ मासेषुशुक्लपक्षेषुदुष्टग्रहविवर्जि
ते॥१॥द्वितीयापंचमीषष्ठीसप्तमीनवमीतथा॥द्वादश्यैकादशीग्राह्यापूर्णिमा
चत्रयोदशी॥२॥आर्द्राशतभिषक्स्वातीरोहिणीश्रवणोमृगः॥पूर्वाषाढोत्त
राषाढाज्येष्ठाश्लेषाचरेवती॥३॥चित्राहस्तोधनिष्ठास्यादनुराधाचसिद्धिदा।
सौभाग्यःशोभनोयुष्मान्सिद्धिःसाध्यःशिवःशुभः॥४॥वृद्धिःप्रीतिर्धृ
तिःसिद्धिर्ध्रुवःशुक्लस्तशोभनः॥बवंचबालवंचैवकौलवंतैतिलंतथा॥५॥
मैत्रंपरममैत्रंचसंक्षेमंचतथाशुभं॥लग्नेषुवृश्चिकःसिंहोमेषोमिथुनकर्कटौ।
तथाकन्यातुलाकुंभोवृषभश्चप्रशस्यते॥उत्तराशांगतेभानौलिंगस्थापनमु १
त्तमं॥६॥ ॥इतिप्रतिष्ठाकालः॥ ॥प्रतिष्ठाकर्मदेवानांकर्तुमिच्छन्हिमानवः।

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2A)

संपाद्यसंभृतिंसम्यक्सर्वकर्मोपयोगिनी॥१॥पंचरात्रंचतुरात्रंत्रिरात्रंचैकरा
त्रकं॥आश्रित्यान्यतमंपक्षंकर्मसिद्धिर्यथाभवेत्॥२॥देवप्रतिष्ठासुदिनंसम्य
ङ्निश्चित्ययत्नतः॥देवप्रतिष्ठादिवसादर्वाग्वैसप्तमेदिने॥कुंडानिसम्यङ्निर्माय
मंडपेशुभलक्षणे॥३॥ ॥अथसंभाराः॥ ॥अर्कादिसमिधांप्रत्येकमष्टसहस्रं।
संक्षेपपक्षेआज्यचर्वादिलोकपालादियागायपालाशादिसमिधांप्रत्येकमष्टस
हस्रमष्टशतंवा।पुष्पमालाकुंकुमकर्पूरकस्तूरीचंदनगुग्गुलधूपदहनेआरात्ति
कंघंटापादुकादर्पणं॥बलिसामग्री।पायसभक्ष्यभोज्यंनैवेद्यं।होमार्थमाज्यतिल
यवाक्षतफलादिकं।प्रतिकुंडंविष्टरा।चत्वारः।प्रतिकुंडंस्रुक्स्रुवौ।आसनानि।त्रि
सूत्री।श्वेताणीसूत्रं।सर्वतोभद्रादिरचनायश्वेतरक्तपीतनीलकृष्णवर्णकाः।स्नप
नकलशाः।पल्लवाः।कदलीस्तंभाः।पताकाध्वजाश्चदशदश।तेषांवेणुदंडाश्च।व
ज्रमौक्तिकवैडूर्यशंखस्फटिकपुष्परागेंद्रनीलमहानीलाःइतिरत्नाष्टकं।हरिता

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(3)

प्र॰हे॰ २ लमनःशिलाभ्रकहस्तांजनमाक्षिकसीसस्वर्णगैरिका इति धात्वष्टकं। तिलयवमु
द्गगोधूमनीवारश्यामाकसर्षपव्रीहि इति बीजाष्टकं। सुवर्णरजतताम्रलोहत्रपुसी
सकांस्यपीत्याख्यधात्वष्टकं। मधुपर्कपात्रं सौवर्णं ताम्रं वा। अर्घ्यपात्रं। शक्त्यैकद्वित्रि
माषसुवर्णशलाका। स्थापनीयकलशरत्नानि षोडशद्वारकलशाष्टौ लोकपालक
लशाः। वेदीकलशाश्चत्वारः। वास्तुमंडलकलशः। कुंडकलशाः कुंडसंख्यया। निद्राक
लशाः। स्नपनकलशाः पंचचत्वारिंशत् कलशसंख्यया शरावाणि। धारासहस्रा
न्वितौ कलशौ। गजाश्वरथ्यावल्मीकसंगमकूलद्वयवराहोत्खातराजद्वारमृदः।
जटामांसीवचाकुष्ठशैलेयहरिद्राद्वयशुंठीचंपकमुस्ता इति दश। सर्वौष
ध्यः। पंचगव्यं पृथक्पृथक्। व्रीहियवतिलगोधूमनीवारश्यामाकमुद्गा इति सप्तधा
श्वेत न्यानि। शय्या सोपस्करा। वस्त्रं चामरं विचित्रवितानं त्रयो दुकूलपट्टाः। ऋत्विग्वर २
णसामग्री। शिल्पिवस्त्रयुगमित्यादिसंपादितसंभारो शिवप्रतिष्ठादिनात्प्राक्स

(3A)

प्तर्दिनेत्रिदिनेद्विदिनेसद्योवाप्रासादाग्रेमंडपंकृत्वा॥तत्तरस्यांवातन्मध्येचतुरस्त्रांपं
चहस्तांचतुर्हस्तांवाहस्तोछ्रितांवेदी॥मंडपोत्तरेचतुर्द्वारंस्नपनमंडपंतत्रवेदिकात्र
यंचकृत्वाशिल्पिस्थानात्प्रासादंप्रादक्षिण्येनदेवंतत्रानीय॥इतिसंक्षेपतःसंप्रा
राः॥विशेषेणहेमाद्रिणोक्तं॥ ॥अथप्रयोगः॥ ॥ततोभद्रपीठेप्रागग्रेषुदर्भेषु
यजमानःसपत्नीकःप्राङ्मुखोपविश्यत्रीन्प्राणानायाम्यकृत्वापत्न्यासमन्वारब्धः
संकल्पंकुर्यात्॥अद्यात्मनःपापक्षयपूर्वकमातृनासहपितृतोमातृतश्चदश
पूर्वदशापरैकविंशतिपुरुषमुक्तिकामनया॥लिंगवेदीगतपरमाणुसमसंख्यायु
गसहस्रावधिशिवलोकनिवासपूर्वकशिवसायुज्यसिध्यर्थंअक्षय्यसुखकामो
हंतथासर्वदुःखनाशव्याधिभयबंधुधनक्षयाभावसाग्रवर्षशतजीवित्वैककल्प
स्वर्गवासनरकनिमग्नकुलायुतोद्धरणतदीयशिवलोकनयनश्वेतद्वीपाधिक

(५)

हे०प्र० ३ रणकुंडायुतयुक्तात्मकर्तृकशिवलोकनिवासकामः श्रीपरमेश्वरप्रीत्यर्थं अद्यप्र
भृतिसप्तदिनपर्यंतं स्वकृतशैलप्रासादप्रतिष्ठासहितं चिरंतनार्चितशिवप्रतिष्ठाख्यं
कर्म करिष्ये इति संकल्प्य ॥ ततस्तदंगत्वेन लक्षहोमसंकल्पः ॥ ॥ अद्य मम पत्नीपुत्रादि
कुटुंबसहितस्य एतत्कर्मोपयुक्तसुहृत्संबंधिसहितस्य शिवप्रतिष्ठाख्यकर्मणि प्रा
सादवास्तौ मूर्तिपिंडिकामंडपकुंडतोरणस्तंभादिषु प्रधानांगकर्मसु सूचनाहीनाधि
कांगतादिकर्मान्यथाकरणादिविविधावद्यसूचितसर्वारिष्टनिबर्हणार्थं अस्यक
र्मणः सांगुण्यार्थं आयुरारोग्यऐश्वर्याभिवृद्ध्यर्थं च यज्ञपुरुषरूपी सवितृदेवताप्री
त्यर्थं तिलव्रीहिभिः सवितृगायत्र्या ऋत्विग्द्वारा कूष्मांडहोमपुरःसरं लक्षहोमम् अधि
कफलप्राप्तये वसोर्द्धारां च करिष्ये ॥ ततस्तदंगतया कर्मणः निर्विघ्नतासिध्यर्थं गण
पतिपूजनपूर्वकं स्वस्तिपुण्याहवाचनं मातृकापूजनं नांदीश्राद्धम् आचार्यादिवरणं ३
च करिष्ये ॥ आभ्युदयिकं विधिवत्कृत्वा आचार्यादीन्वृणुयात् ॥ यजमानः । [illegible]

(3A)

अमुकगोत्रोत्पन्नोमुकशाखीअमुकशर्मायजमानोहं।अमुकगोत्रोत्पन्नममुकशाखा
ध्यायिनंअमुकशर्माणंब्राह्मणंनूतनप्रासादपूर्वकंचिरंतनार्चितशिवप्रतिष्ठाख्येक
र्मणिशिवप्रतिष्ठाकर्मकारयितुंएभिर्वस्त्रालंकारतांबूलादिभिराचार्यत्वामहंवृणे॥वृतो
स्मीतिप्रतिवचनं।वस्त्रालंकारादिभिराचार्यंपूजयेत्प्रार्थयेच्च॥ ॥मंत्रमूर्तिर्भवान्नाथसं
साराब्धेघनाशन॥प्रतिष्ठादिविधावस्मिन्कुरुकर्मयथोदितं॥१॥यथाशक्रस्यवागी
शश्चाचार्यःसर्वकर्मसु॥तथामयात्वमाचार्योवृतोस्मिन्यज्ञकर्मणि॥२॥त्वत्प्रसादा
च्चपूर्तस्यसमग्रंफलमाप्नुयां॥संसारभयभीतेनयज्ञएषप्रकीर्तितः॥३॥प्रारब्धस्त्व
त्प्रसादेननिर्विघ्नंमेभवेदिह॥ ॥एवंब्राह्मणांसदस्यमृत्विजश्च॥ ॥यथाचतुर्मुखो
ब्रह्मास्वर्गलोकेपितामहः॥तथात्वंममयज्ञेस्मिन्ब्रह्मात्वेनवृतोह्यसि॥१॥त्वंनोगुरुः
पितामातात्वंप्रभुस्त्वंपरायणं॥त्वत्प्रसादाद्द्विप्रर्षेसर्वमेस्यान्मनोगतं॥२॥आपद्वि
मोक्षणार्थायकुरुकर्मह्यतंद्रितः॥ऋत्विग्भिःसहितैःशुक्लैःसमेतैःसुसमाहितैः॥३॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5)

प्र°हे° आचार्येण च संयुक्तः कुरु कर्म यथोदितं॥ ॥इति ब्रह्माणं प्रार्थ्य॥ तथा सादस्यं॥ यथा च
४ तुर्मुखो ब्रह्मा सर्वकर्मविशारदः॥ अस्मिन्यज्ञे त्वमोसि तं सादस्योभव सुव्रत॥१॥ ॥अस्य
यागस्य निष्पत्तौ भवंतो भ्यर्थिता मया॥ सुप्रसन्नाः प्रकुर्वंतु शांतिकं विधिपूर्वकं॥२॥ इति स
र्वान्प्रार्थ्य॥ ततः आचार्यप्रमुखान् ऋत्विजः स्वशाखोक्तविधिना मधुपर्कं कुर्यात्॥ ततो
यजमानः सर्वान् ऋत्विजः प्राङ्मुखानुपवेश्य स्वयं प्रत्यङ्मुखमुपविश्य तस्य दक्षिणतः प
त्नीं चोपवेश्य देशकालौ संकीर्त्य करिष्यमाणप्रासादपूर्वकशिवप्रतिष्ठाख्ये कर्मणि वृता
न् ऋत्विजो मधुपर्केणार्हयिष्ये॥ ततो यजमानः वरणक्रमेण मधुपर्कादिना तान् पृथ
क्पृथक् पूजयेत्॥ मधुपर्के त्वेवं॥ विष्टरो विष्टरो विष्टरः प्रतिगृह्यतामिति यजमाने
नोक्त्वा पंचविंशतिकुशमयं विष्टरं ब्राह्मणहस्ते दद्यात्॥ स च प्रतिगृह्णामीति स्वी
कृत्य॥ अहं वर्ष्मेत्यस्य वामदेव ऋषिः॥ विष्टरो देवता॥ अनुष्टुप् छंदः॥ विष्टरोपवेशने
विनियोगः॥ ॐ अहं वर्ष्म सजातानां विद्युतामिव सूर्यः॥ इदं तमधितिष्ठामि यो मा क ४

Joint project of Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(5A)

श्चाभिधास्यति॥इतिमंत्रेणोदगग्रेविष्टरउपविशेत्॥पाद्यमितित्रिः।प्रतिगृह्यताम्मि
तिनिवेदयेत्।प्रतिगृह्णामीतिस्वीकृत्य।अर्घ्यमर्घ्यमर्घ्यं।प्रतिगृह्यतामितिनिवेदितं
गंधफलमाल्यादियुक्तंअर्घ्यंप्रतिगृह्णामीत्यंजलिनाप्रतिगृह्य॥आचमनीयमिति
त्रिः।प्रतिगृह्यतामितिनिवेदितंप्रतिगृह्णामीतिस्वीकृत्य।निवेदितात्किंचिदुध्दृत्यअ
मृतोपस्तरणमसीत्यनेनाचार्यपिबेत्॥मित्रस्यत्वाचक्षुषाप्रतीक्षेइतिमंत्रेणब्राह्मणः
कांस्येनिहितंमधुयुक्तंदधिरूपंमधुपर्कंमधुवऽभ्येआज्ययुक्तमानीयमानमीक्षते।अ
थयजमानः।मधुपर्कोइतित्रिःप्रतिगृह्यतामितिनिवेदयेत्।ततोब्राह्मणः।देवस्यत्वा
सवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांप्रतिगृह्णामीतिअंजलिनाप्रतिगृह्य
मधुवाताइतितृचेनावेक्षते।मधुवाताइतितृचस्यराहूगणोगोतमऋषिः।विश्वेदे
वादेवता।गायत्रीछंदः।मधुपर्कावेक्षणेविनियोगः।ॐमधुवाता०तुनः३।ततःस
व्यपाणौकृत्वाअंगुष्ठोपकनिष्ठिकाभ्यांत्रिःप्रदक्षिणमालोड्य।वसवस्त्वागायत्रेण

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

ग्र०हे० छंदसा भक्षयंत्विति पूर्वस्यां। किंचिदुत्क्षिपेत्। रुद्रास्त्वा त्रैष्टुभेन० त्विति दक्षिणस्यां। आ
५ दित्यास्त्वा जागतेन० यंत्विति पश्चात्। विश्वे त्वा आनुष्टुभेन० यंत्विति उत्तरतः। भूतेभ्य
स्त्वेति मंत्रेण अंतरिक्षे त्रिरुत्क्षिपेत्। ततो मधुपात्रं निधाय ब्राह्मणो मधुपर्कैकदेशं गृ
हीत्वा विराजो दोहोसीति प्राश्याचम्य पुनर्गृहीत्वा। विराजो दोहमशीयेति प्राश्याचम्य
पुनर्गृहीत्वा। मयि दोहः पद्यायै विराजः इति प्राश्याचम्य। नसर्वं प्राश्नीयात्। नतृप्तिंग
च्छेत्। शेषमप्सु निक्षिप्येत्। पूर्ववदाचमनीयोदकेन अमृतापिधानमसीति मंत्रेण पिबे
त्। आचम्योदकेनाचमेत्। पुनस्तदेवोदकं गृहीत्वा। सत्यं यशः श्रीर्मयि श्रीः श्रयतामि
ति मंत्रेण प्राश्याचम्योदकेन द्विराचामेत्। ततो यजमानः। गौर्गौर्गौः प्रतिगृह्यतामि
ति निवेदयेत्। ब्राह्मणः प्रतिगृह्णामीति स्वीकृत्य। माता रुद्राणामिति मंत्रस्य भार्ग
वो जमदग्निरृषिः। गौर्देवता। त्रिष्टुप्छंदः। गोरुत्सर्जने विनियोगः। ॐ माता रुद्रा ५
णां दुहिता० धिष्ट। इत्यर्चं जपित्वा। ओमुत्सृजेति प्रैषं वदेत्। ततोऽन्यैरुत्सृजेयुः॥

(8A)

अथ यजमानः। युवंवस्त्राणीतिवस्त्रं। हिरण्यरूपेत्याभरणं। यज्ञोपवीतमित्यज्ञोपवीतं। गं
धद्वारेतिगंधं। याः फलिनीरितिफलं॥ ॥इति आचार्यादिमधुपर्कपूजा॥ ॥अथयजमानः।
ब्रह्मास्सदस्यादीनांमधुपर्कादीनांतंपूजनंपूर्ववत्। अस्ययागस्यनिष्पत्तोभवंतोभ्यर्थिता
मया। सुप्रसन्नैः प्रकर्तव्यंकर्मेदंविधिपूर्वकं॥१॥ भगवन्सर्वधर्मज्ञसर्वधर्मभृतांवर॥ वितते
ममयज्ञेस्मिन्ऋत्विक्कुलंभवसुव्रत॥२॥ इतिप्रत्येकंप्रार्थयेत्। लक्षहोमंकुर्यां उ होमं वा कृ
त्वा। ततः प्रासादस्यपूर्वस्यांदिशिउत्तरस्यांवाषोडशहस्तमानं दशहस्तंवावाजपेयाद्युक्तप्र
न कारणमंडपोविधेयः। तत्रमंडपमध्येत्रिभागैर्हस्तमात्रांसमचतुरस्त्रांवेदीविधाय। वेद्याः थां
पूर्वाग्नेयदक्षिणनैर्ऋतिपश्चिमवायव्युत्तरैशान्यादिषुक्रमेणचतुरस्त्रयोन्यर्द्धचंद्रास्त्र
स्त्रि वृत्तषडस्त्रपद्माष्टास्त्रिकुंडानिउक्तप्रकारेणकृत्वा। मंडपेशानकोणेईशानेंद्र्योर्मध्ये
चतुरस्त्रंवृत्तंवाकुंडंचकृत्वा। मंडपेशानकोणेहस्तमात्रामर्द्धहस्तांवावप्रत्रययुक्तांसमच
तुरस्त्रांवेदींकृत्वा। ततोयजमानः। पूर्णकलशमर्घ्यपात्रफलदधिदूर्वामांगलिकंसुवास्ति

(7)

प्र०हे० [illegible]नीश्चायतःकृत्वाआचार्यसहितैर्ब्राह्मणैःसहब्रह्मघोषेणदुंदुभिशब्दैश्चदेवयज
६ नमंडपंगच्छेत्।सपत्नीकोऽर्घ्यपात्रकरःशाकुनसूक्तंपठन्वक्ष्यमाणमंडपस्यपश्चिमद्वा
रेस्थित्वा।चतुर्भुजांशुक्लकुंकुमपृष्ठोपरिस्थितांपद्मशंखचक्रशूलधरांप्रसन्नाननांभूमिं
ध्यात्वा।आगच्छसर्वकल्याणिवसुधेलोकधारिणि।पृथिवीब्रह्मदत्तासिकाश्यपेनाभिनं
दिते॥इतिसंप्रार्थ्य।पुष्पांजलिंदत्वा।उद्धृतासिवराहेणकृष्णेनशतबाहुना॥दंष्ट्राग्रेलो
क्यादेवियत्नार्थंप्रणमाम्यहं॥१॥ब्रह्मणानिर्मितादेविविष्णुनाशंकरेणच॥पार्वत्या
चैवगायत्र्यास्कंदेवैश्रवणेनच॥२॥यमेनपूजितेदेविधर्मस्यविजिगीषया॥सौभाग्यं
देहिपुत्रांश्चधनंरूपंचदेहिमे॥गर्हा॥धन्यंमयादत्तंसौभाग्यंचप्रयच्छमे॥३॥जानु
भ्यांधरणींगत्वार्घ्यंदद्यात्।अष्टांगार्घ्यस्यलक्षणं।तोयक्षीरकुशाग्रतिलतंदुलय
वसर्षपपुष्पद्रव्याणीत्यष्टांगार्घ्यं।पश्चिमद्वारेणमंडपंप्रविशेत्।मंडपप्रादक्षिण्यन ६
वेद्याःपश्चिमतःआचार्यप्रमुखाःसर्वेऋत्विजःपूर्वाभिमुखाःउपविशेयुः॥अथय

(7A)

याः जमानः।वेद्यांदक्षिणेतेणेउदङ्मुखउपविशेत्।आचार्यादयःसदस्यानुमताःकृच्छ्रादि
प्रायश्चित्तंकुर्युः।यजमानाचार्यादयःपवनपावनभूतशुध्यादिकंकृत्वा।ततःआचार्य
रु प्रमुखाःसर्वेयथाकर्मकुर्वंतीतियजमानोब्रूयादितिहेमाद्रिः।अथाचार्यःआचम्यप्राणा
यामादिदेशकालौस्मृत्वाअद्ययजमानस्यकृतसंकल्पसंसिध्यर्थंयजमानानुज्ञातो
देशकालानुसारतःऋत्विगाचार्यादिसहितःशिवप्रतिष्ठादिकर्मकरिष्ये।निर्विघ्नता
सिध्यर्थंगणपतिपूजांकरिष्ये।गणेशं।पूजयित्वापुण्याहंवाचयित्वाआचार्यप्रमुखाः
सर्वेऋत्विजःस्वशरीरशुध्यर्थंपवनपावनभूतशुध्यादिप्राणप्रतिष्ठामातृकान्यासा
दींश्चकुर्युः।चित्पतिर्मापुनात्वित्यादिमंत्रैःरुद्रकांडपाठानुवाकैःपवनपावनंका
र्यं।तथाभूतशुध्यादिमातृकान्यासादींश्चकृत्वा।पुरुषसूक्तंत्रिवारंजपेत्।ततः
आचार्यः।भूमिर्भूमिमगान्माता मातरमप्यगात्।भूयास्मपुत्रैःपशुभिर्योनो
द्वेष्टिसभिद्यतामितिभूमिंस्पृष्ट्वा।पंचगव्यंकुर्यात्।अद्येत्यादि॰पंचगव्यसंमील

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(४)

प्र०हे० नंकरिष्ये।गायत्र्यागोमूत्रं।गंधद्वारामितिगोमयं।आप्यायस्वेतिक्षीरं।दधिक्राव्णइतिदधि।
७ शुक्रमसीतिघृतं।देवस्यत्वेतिकुशोदकं।प्रणवेनालोड्य।प्रणवेनाभिमंत्र्य।प्रणवेनयज्ञिय
नि काष्ठेनैर्मथ्य॥इतिपंचगव्यं॥ततःईशान्यांगत्वागौरसर्षपैःसव्यक्रमेणमंडपांतोविकिरे
त्।यदत्रसंस्थितंभूतंस्थानमाश्रित्यसर्वदा॥स्थानंत्यक्त्वातुतत्सर्वंयत्रस्थंतत्रगच्छतु॥
॥१॥जितंतेपुंडरीकाक्षनमस्तेविश्वभावन॥सुब्रह्मण्यनमस्तेस्तुमहापुरुषपूर्वज॥२॥सि
द्धार्थकान्समादायकृत्वाचास्त्राभिमंत्रितान्॥ईशानाभिमुखस्थित्वाविकिरेत्सर्वतो
दिशं॥३॥ततःप्रकीर्यंतितथाळाजान्ईशान्यांसंग्रहःकुशैः॥भूतानिराक्षसावापिय
त्रतिष्ठंतिकिंचन॥तेसर्वेप्यपगच्छंतुवास्तुयागंकरोम्यहं॥४॥इतिविकिरमंत्राः॥ततःपं
चगव्येनकुशैःसर्वत्रशुचीवोहव्येतितृचेन।आपोहिष्ठेतितृचेनआपोहिष्ठेतितृचेन
इरावतीदंविष्णुर्मानस्तोकेतिमंत्रैःशंनइंद्राग्नीतिसूक्तेनदेवस्यत्वेतिआपस्तंबशा ७
खोक्तविधिनाभ्युक्ष्यःसंस्रुतःपृथिव्याइत्युत्तरनारायणेनवाप्रोक्षणंकार्यं।ततःकु

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(8A)

वांजलिःस्वस्त्ययनंतार्क्ष्यमितिमंत्रद्वयंपठेत्।देवाःआयांतुयातुधानाःअपआयांतु।शिव
यजनंरक्षस्त्वितिभूमौप्रादेशंकुर्यात्॥ ॥अथप्रासादसंस्कारः॥ ॥आचार्यःवक्ष्यमाण
लक्षणंसहिरण्यंकलशंसपल्लवंवस्त्रस्रक्चंदनलिप्तांगमुदकेनापूर्यतद्वक्त्रपात्र
अक्षतपद्मैःकर्णिकायांभास्करंपरितःपूर्वादिदलेषुसोमादिग्रहान्प्रणवाद्यैर्नमोंते
र्नाममंत्रैरावाह्यभास्करंविभावसुंध्यात्वाकृत्वानैवेद्याद्युपचारपूजांविधायतंकलश
मुद्धृत्यब्रह्मघोषेणदुंदुभिशब्देनप्रागारमध्येशानपर्यंतंशाकुनसूक्तंपठन्प्रागुक्त
मंत्रांश्चप्रासादांतर्मंडपांतश्चकुड्यभित्तिसंधारांभ्रामयेत्।मंत्राश्च।भूतानिराक्षसा
य वापीत्यादिःपूर्वोक्ताः।ऊर्जस्यांगिरस्थूणान्महदाशृणोतुदेवःसविता भद्रंमेइतिमंत्रैःसमु
च्चार्यद्वादशाक्षरमंत्रेणअन्यमंत्रेणअष्टजूत्तेनमंडपप्रासादभूमौपुष्पांजलिंवि
किरेत्।ततः।प्रासादस्यतदंगानामादौकर्मक्रमागतं॥संस्क्रियापरिहार्यत्वान्मे
उपस्यततःपुनः॥शिल्प्यादिदोषयुक्तायांभूमौपुरुषावधिखातायांमुष्टिमात्रैःपाषा

Joint project of the Rajawada Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(१)

प्र०हे० णैरापूर्यसुदृढंविधिनाप्रासादोचितांभूमिंनिर्मायप्रासादंकृत्वातत्रपूर्ववद्भूतसंघंनिःसार्य
८ तेनैवकलशेनपूर्वविहारभ्रमणादिविधायप्रासादेमंडपेवापूर्वस्ततोचार्येणविधिनावा
स्तुपूजांविधाय॥ ॥अथवास्तुपूजा॥ ॥मंडपनैर्ऋत्येहस्तमात्रांवेदींविधायतदुपरिव
स्त्रंप्रसार्यआचार्यःदेशकालौसंकीर्त्य।कुंडमंडपादिषुहीनाधिकांगतादिवास्तुदोष
सूचितसर्वानिष्टनिबर्हणार्थंवास्तुयजनंकरिष्ये।वेद्युपरिसुवर्णादिशलाकयान
वरेखाःप्राक्पश्चिमायताःनवदक्षिणोत्तरायताःकृत्वामध्येकोष्टचतुष्टयमेकीकृत्य
प्रतिकोणंत्रिषुपदेषुसूत्रंदद्यात्ततोचतुर्विंशतिरर्द्धपदानिसंपद्यंते।मंडलस्याग्नेय
कोणेशंकुचतुष्टयं।विशंतुभूतलेनागा।लोकपालाश्चसर्वतः॥प्रासादेत्ववतिष्ठंतु
आयुर्बलकराःसदा॥१॥इतिमंत्रेणआग्नेयादिदिक्षुशंकून्रोपयेत्॥अग्निभ्योप्य
थसर्पेभ्योयेचान्येतत्समाश्रिताः॥तेभ्योबलिंप्रयच्छामिपुण्यमोदनमुत्तमं॥२॥इ ८
तिमंत्रेणशंकुवामपार्श्वेमाषभक्तबलिंदद्यात्॥नैर्ऋत्याधिपतिश्चैवनैर्ऋत्यांयेत्र

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(9A)

राक्षसाः॥तेभ्योबलिंप्रयछामिसर्वंरक्षंतुमंत्रितं॥१॥ओंनमोवायुरक्षेभ्योयेचान्येतत्समा
श्रिताः॥तेभ्योबलिंप्रयछामिपुण्यमोदनमुत्तमं॥२॥ईशान्ये॥रुद्रेभ्योप्यथसर्पेभ्योयेचान्ये
तत्समाश्रिताः॥तेभ्योबलिंप्रयछामिगृह्णंतुसततोत्सुकाः॥३॥ततोवेद्यांवस्त्रोपरिनवरेखाः
प्रागायताउत्तरसंस्थाःकार्याः॥रेखादेवतानामानि॥शांता१यशोवती२कांता३विशाला४प्राण
वाहिनी५सती६वसुमती७नंदा८सुभद्रा९इति॥ताःसंपूज्य॥तथैवदक्षिणोत्तरायताःकृत्वा॥
हिरण्या१सुव्रता२लक्ष्मीः३विभूतिः४विमला५प्रिया६जया७ज्वाला८विशोका९इति॥एताः
पूजयेत्॥ततः॥मध्यपदचतुष्टयेवास्तोर्हृदयेब्रह्मणेनमः॥ब्रह्माणंआवाहयामि॥एवंसर्वत्र
पूर्वपदद्वयेदक्षिणस्तनेअर्यम्णे०अर्यमणं०॥तद्दक्षिणपदद्वयेजठरदक्षिणेविवस्वते०
विवस्वंतं०॥तत्पश्चिमपदद्वयेजठरवामेमित्राय०मित्रं०॥उदक्पदद्वयेवामस्तनेपृथ्वीध
राय०पृथ्वीधरं०॥आग्नेयपदार्द्धयोर्दक्षिणहस्तेसावित्रसवितृभ्यां०सावित्रसवितारौ०॥
नैर्ऋत्यपदार्द्धयोर्वृषणमेढ्रयोर्विबुधाधिपजयौ॥वायव्यपदार्द्धयोर्वामहस्तेराजयक्ष्मरुद्रे॥

विबुधाधिपजयाभ्यां० राजयक्ष्मरुद्राभ्यां०

आपापवत्साद्यां॰

पा

प्र॰हे॰ ईशानपदार्द्धयोरुरौमुखे आपवत्सौ। ततः अंत्यपंक्तिगतेईशानपदेदक्षिणार्धेशिरसिशि
२ खिने॰ शिखिनं॰। तद्दक्षिणसार्द्धपदेदक्षिणनेत्रेपर्जन्याय॰ पर्जन्यं॰। तद्दक्षिणपदद्वयेद
क्षिणश्रोत्रेजयंताय॰ जयंतं॰। तद्दक्षिणपदद्वयेदक्षिणांसेकुलिशायुधाय॰ कुलिशायुधं॰
तद्दक्षिणपदद्वयेदक्षिणबाहौसूर्याय॰ सूर्यं॰। तद्दक्षिणपदद्वयेदक्षिणबाहवेसत्याय॰।
सत्यं॰। तद्दक्षिणसार्द्धपदेदक्षिणकुर्परेभृशाय॰ भृशं॰। तद्दक्षिणाग्नेयपदार्धेदक्षिणबा
हौआकाशाय॰ आकाशं॰। तत्पश्चिमार्द्धे तद्दक्षिणप्रबाहवेवायवे॰ वायुं॰। तत्पश्चिमसार्द्ध
पदेदक्षिणमणिबंधेपूष्णे॰ पूषणं॰। तत्पश्चिमपदेतदुत्तरपदे च दक्षिणपार्श्वेवितथाय॰ वि
तथं॰। तत्पश्चिमपदद्वयेदक्षिणपार्श्वेएव गृहक्षताय॰ गृहक्षतं॰। तत्पश्चिमपदद्वयेदक्षि
णोरौयमाय॰ यमं॰ तत्पश्चिमपदद्वयेदक्षिणजानौगंधर्वाय॰ गंधर्वं॰। तत्पश्चिमसार्ध
पदेदक्षिणजंघायांभृंगराजाय॰ भृंगराजं॰। तत्पश्चिमनैर्ऋत्यपदार्द्धेदक्षिणस्फिचिमृ २
गाय॰ मृगं॰। तदुत्तरार्धेपादयोः पितृभ्यो॰ पितॄन्॰। तदुत्तरसार्द्धपदेवामस्फिचिदौ

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(10A)

वारिकाय॰दौवारिकं॰।तदुत्तरपदेतत्प्राक्पदेच्चवामजंघायांसुग्रीवाय॰सुग्रीवं॰।तदु
त्तरपदद्वयेवामजानौपुष्पदंताय॰पुष्पदंतं॰।तदुत्तरपदद्वयेवामोरौवरुणाय॰वरुणं॰।त
दुत्तरपदद्वयेवामपार्श्वेअसुराय॰असुरं॰।तदुत्तरसार्द्धपदेवामपार्श्वेएवशोषाय॰शोषं॰
तदुत्तरपदार्धेवाममणिबंधेपापाय॰पापं॰।तत्प्राक्पदार्धेवामप्रबाहौरोगाय॰रोगं॰।तत्
प्राक्सार्धपदेवामप्रबाहवेअहिभ्य॰अहिं॰।तत्प्राक्पदद्वयेवामकूर्परेमुख्याय॰मुख्यं॰।तत्
प्राक्पदद्वयेवामप्रबाहवेभल्लाटाय॰भल्लाटं॰।तत्प्राक्पदद्वयेवामबाहौसोमाय॰सोमं॰
तत्प्राक्पदद्वयेवामांसेसर्पेभ्यो॰सर्पान्॰।तत्प्राक्सार्द्धपदेवामश्रोत्रेअदितये॰अदितिं॰
तत्प्रागर्धपदेवामनेत्रेदितये॰दितिं॰।उत्तरेवास्तोष्पतेइतिवास्तुप्रतिमांस्थाप्य।ततोमं
डलाद्बहिः ईशानादिविदिक्षुकोणे।चरकीं१ विदारीं२ पूतनां३ पापराक्षसीं४।प्रागादि
स्कंदं१ चतुर्दिक्षु।अर्यमणं२ जृंभकं३ पिलिपिच्छं ४।पुनःपूर्वादिदिक्षु।इंद्रं।अग्निं।यमं।नि
ऋतिं।वरुणं।वायुं।सोमं।ईशानं।आवाह्यसर्वाःसंपूज्य।मंडलादीशान्यांकलशं

प्र०हे० संस्थाप्य तत्र वरुणमावाह्य पूजयेत् प्रार्थयेच्च ॥ यथा मेरुगिरेः शृंगं देवानामालयः सदा ॥
१० तथा ब्रह्मादिदेवानां मम यज्ञे स्थिरो भव ॥ १ ॥ इति प्रार्थयेत् । ततो आचार्यः स्थंडिलं निर्माय स्व
गृह्योक्तविधिनाग्निं प्रतिष्ठाप्य ध्यात्वा न्वादध्यात् ॥ चक्षुष्यंते ब्रह्मादिपंचचत्वारिंशद्देव
ताः प्रति देवतं प्रतिद्रव्यं च अष्टाविंशत्या अष्टाविंशति संख्याकाभिः उदुंबरसमित्तिलयवच
रुभिर्व्याहृतिभिर्यक्ष्ये । वास्तोष्पतिं । वास्तोष्पतेति चतसृभिर्ऋग्भिः क्रमेण अष्टोत्तरशतसं ३×
ख्याकाभिः प्रतिद्रव्यं तैरेव द्रव्यैर्यक्ष्ये । शेषेण स्विष्टकृतमित्यादि शेषं समानं । समाप्ते होमे
स्विष्टकृदाद्युत्तरांगं विधाय ब्रह्मादिभ्यः पायसबलीन् दद्यात् । ततः प्रणीताविमोकादिक
मशेषं समापयेत् । ततः पावमानेन राक्षो... ...नकृणुष्व पाज इति मंडपं त्रिसूत्र्यावेष्टयित्वा
वास्तुकलशोदकेन यजमानमभिषिंचेदिति वास्तुपूजनं ॥ ॥ अथ प्रासादप्रक्षालनविधिः ।
पंचकषायोदककलशेन पंचामृतं पंचपल्लवं पंचगव्यं पंचरत्नसर्वौषध्युदकेन उत्तरना
रायणाद्यर्चोश्युद्धिविधिना ब्रह्मघोषेण दुंदुभिशब्देन प्रताप्यमानेन प्रासादं प्रक्षाल्य १०
६× वास्तोष्पते ध्रुवा स्थूणा इति अष्टोत्तरसंख्यया बिल्वफलाकृतिभिर्यक्ष्ये । चरक्यादिदेवताभ्य एकैकया [illegible]

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com